अयः पुत्रा जज्ञिरे भरतर्षभ ! । देवापिः शान्तनुश्चैव बाह्लीकश्च महारथः । देवापिश्च प्रवव्राज तेषां धर्म्महितेऽप्सया" भा०आ० ९४अ० "ऋचस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः । देवापिः शान्तनुस्तस्य बाह्लीक इति चात्मजाः । पितृराज्यं परित्यज्य देवापिस्तु वनं गतः" भाग० ९।२२।११ "देवापिर्योगमास्थाय कलापग्राममास्थितः । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति" तत्रैव [शब्दच० ।

**देवाभीष्ट** त्रि० ६त० । १देवानामभिलषिते २ताम्बूल्यां स्त्री

**देवायतन** न० ६त० । देवप्रतिमालये "न देवायतनं गच्छेत् कदाचिद्वाऽप्रदक्षिणम् । न पीड़येद्वा वस्त्राणि न देवायतनेष्वपि" कूर्म्मपु० "न जीर्णदेवायतने न वल्मीके कदाचन" मनुना तत्र मूत्रोत्सर्गः प्रतिषिद्धः ।

**देवायुध** न० ६त० । इन्द्रधनुषि सूर्य्यप्रतिकूलदिशि सजलजलधरयुक्ते गगने सूर्य्यकिरणप्रतिबिम्बेन जाते धनुराकारे पदार्थे हेम०इन्द्रायुधशब्दे ९५४पृ० दर्शितं तदुत्पत्तिकारणं दृश्यम् । ६त०। २देवानामायुधे वज्रादौ च ।

**देवायुस्** न० ६त० अच् समा०। देवानां जीवनकाले "मन्त्रेणाहवनीये निर्वपति ह्रसीयसा गार्हपत्ये द्राघीयो हि देवायुषम्" शत० ब्रा० ७।३।१।१०

**देवारण्य** न०देवप्रियं देवभूयिष्ठं वा अरण्यम् । १तीर्थभेदे "प्रयागे देवरमणे देवारण्येषु चैव ह । भोगवत्यां महाराज ! कौशिकस्याश्रमे तथा" भा०उ०१८७अ०। ६त०। २देवनामारामे च "अलसद्योतयामासुर्देवारण्यमिवर्त्तवः" रघुः ।

**देवारि** पु० ६त० । १असुरे "येन देवारयः सर्वे महायुधि निपातिताः" भा०द्रो० ८१अ० ।

**देवार्पण** न० देवेषु अर्पणम् । देवोद्देशेन देयद्रव्यस्य तद्दानजन्यफलस्य वा १त्यागे । देवेभ्योऽर्प्यन्ते यैः अर्पि—करणे ल्युट् । २ऋग्वेदादौ "पृथग्भूतानि चान्यानि यानि देवार्पणानि वै" भा० अनु०८६त०। "देवार्पणानि ऋग्यजुःसामानि पृथग्भूतानि मूर्त्तिमन्तीत्यर्थः" नीलक०।

**देवार्य्य** पु० अर्हद्गणभेदे "अरिष्टनेमिस्तु नेमिर्वीरश्चरमतीर्थकृत् । महावीरो वर्द्धमानो देवार्य्यो ज्ञातनन्दनः। गणा नवास्यर्षिसंघा एकादश गणाधिपाः" हेमच० ।

**देवार्ह** त्रि०देवानर्हति दाने अर्ह—अण् उप०स०। १देवाय दानयोग्ये २सुरपर्ण्णे न० राजनि०।

**देवालय** न० ६त० । १स्वर्गे २देवप्रतिमाभवने च शब्दार्थकल्प०। ३सहदेवीलतायां स्त्री राजनि०। [हला०।

**देवाला** स्त्री देव इवालति अल—अच् । रागिणीभेदे

**देवावास** पु० ६त० । १अश्वत्थवृक्षे त्रि० । २स्वर्गे ३देवप्रतिमालये ४सुमेरौ च "देवावासः शुभः पुण्यो गिरिराजो हिरण्मयः" हरिवं० २३६अ०

**देवावी** पु० देवानवति अव—प्रीणने औणादिक ई । १देवतर्पके सोमे "देवेभ्यस्त्वा देवाव्यं गृह्णामि" यजु० ७।२२। देवा अव्यन्ते तर्प्यन्तेऽस्मिन् आधारे ई । २देवतर्पणाधारे यज्ञे च"इमं नो देव ! सवितर्य्यज्ञं प्रणय देवाव्यम्" यजु० ११।८।

**देवावृध** पु०देवा वर्द्धन्तेऽत्र वृध—क्विप् पूर्वपददीर्घः । पर्वतभेदे "देवावृत् पर्वतश्चैव तथा वै बालुको गिरिः" हरिवं० २३६अ० ।

**देवावृध** पु०देवा वर्द्धन्तेऽनेन वृध—घञर्थे क दीर्घः । सात्वते नृपभेदे "सात्वतान् सत्वसम्पन्नान् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवावृधं नृपम्" हरिवं० ३८अ० "तत्र देवावृधो दत्त्वा सराष्ट्रोऽभ्यपतद्दिवम्" भा०शा० २३४अ०

**देवाश्व** पु० देवस्य शक्रस्याश्वः । उच्चैःश्रवसि अश्वे

**देवाहार** पु० देवयोग्य आहारः । १देवार्हे आहारे ६त०। २अमृते हेमच०।

**देवाह्वय** पु० नृपभेदे "देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः" भा० आ० १अ० नानानृपोक्तौ

**देविक** पु०अनुकम्पितो देवदत्तः मनुष्यनामबह्वचकत्वेन ठन् । द्वितीयादचः परस्य लोपः । १अनुकम्पिते देवदत्ते । दीव्यति दिव—ण्वुल् कापि अतइत्त्वम् । २नदीभेदे स्त्री "अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतावद्देविकामाहुर्देवर्षिपरिषेविताम्" पद्मपु०। ३धुस्तूरे भावप्र० देविकायां भवः अण् । एत आत् दाविक तत्र भवे त्रि०।

**देविन्** त्रि० दिव—णिनि । क्रीडाकारके "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" याज्ञ०।

**देविय** पु० अनुकम्पितो देवदत्तः बह्वच्कमनुष्यनामत्वात् घ द्वितीयादचः परस्य लोपः । अनुकम्पिते देवदत्ते ।

**देविल** त्रि० देव देवने इलच् । १धार्मिके । अनुकम्पितो देवदत्तः इलच् देवियवत् । २अनुकम्पिते देवदत्ते पु०

**देवी** स्त्री देवयति प्रवृत्तिनिवृत्त्युपदेशेन यथाधिकारं व्यवहारयति सर्वान् दिव—णिच् अच् ङीप्, दीव्यति दिव—अच् पचादौ देवट् इति निर्देशात् टित्त्वात् ङीप्